# महासलिलस्य लोकार्पणकार्यक्रमः

महासलिलम् इत्येषः अद्वितीयः वेदाङ्गज्यौतिषग्रन्थः केन्द्रीयसंस्कृतविश्वविद्यालयेन सद्यः प्रकाशितः। अस्य लोकार्पणकार्यक्रमः बेङ्गळूरुनगरे (२८/१२/२४) सम्पन्नः। अस्मिन् कार्यक्रमे भारतीयान्तरिक्षानुसन्धानसङ्घटनस्य (ISRO ) अध्यक्षः अन्तरिक्षविभागसचिवश्च डा। एस्. सोमनाथवर्यः मुख्यातिथिरूपेण भागं गृहीत्वा अवोचत् यत् - अस्माकं पूर्वजाः अन्तरिक्षमधिकृत्य अध्ययनम् अनुसन्धानं चाकुर्वन्। वयम् आधुनिकविज्ञानिनः अधुना आधुनिकसौकर्याणि उपयुज्य अन्तरिक्षस्य विषये ज्ञास्यामः। अस्माकं पूर्वजानां परिश्रमः कार्यं च अस्माभिः सर्वदा प्रकाशनीयम्। महासलिलस्य प्रकाशनेन भूम्याकाशयोर्विषये वातावरणस्य च विषये ज्ञातुं शक्यते। अतः एतस्य ग्रन्थस्य अध्ययनं कुर्मः। पुनश्च एतादृशवैज्ञानिक-ग्रन्थनिर्मात्रे अय्यंगारमहोदयाय अभिनन्दनानि। एवमेव वरखेडीवर्यस्य भारतीयविज्ञानाभिरुचिः कार्यं च अभिनन्दनीयम् अस्तीति।




विशिष्टातिथिः आचार्यः श्रीनिवासवरखेडीवर्यः अवदत् यत् संस्कृतस्य भाषाविभागे मानविक्यां वा समावेशः अथवा विज्ञाने इति चर्चा इतः पूर्वं सभासु चलति स्म। अधुना संस्कृतज्ञविज्ञानिना तपस्विना च सम्पादितस्य वैज्ञानिकग्रन्थस्य (महासलिलस्य) लोकार्पणं भारतीयोत्कृष्टविज्ञानिनां पुरतः सम्पन्नम्। किमन्यत् प्रमाणं अपेक्ष्यते संस्कृतं विज्ञानमेव

विज्ञानमयं च इति ख्यापयितुम्! ISRO अध्यक्षं निवेदयामि यत् चन्द्रयानदिवसस्य आचरणावसरे भारतीयपञ्चाङ्गानुगुणं आचरणं भवेत्। तिथेः उल्लेखः कर्तव्यः। अधुना भारतीयाः वैज्ञानिकाः संस्कृतमूलस्य वैज्ञानिकग्रन्थस्य अध्ययनं कुर्वन्ति इति प्रकाशकत्वेन वयमतीव सन्तुष्टाः स्मः। जैनविश्वविद्यालयेनापि अस्माकं सम्बन्धः वर्तते। अग्रेऽपि शैक्षणिककार्यक्रमेषु सम्भूय कार्यं कुर्मः। य्यङ्गारवर्यः महासलिलस्य आङ्ग्लानुवादमपि विधाय अष्टौ वर्षाणि ग्रन्थस्य निमित्तं व्ययीकृतवान् । तस्य तपः श्लाघ्यम्। एषः नैजः तपस्वी। वैदेशिकाः एनं ग्रन्थं जीर्णीकर्तुं गताः नैव शक्ताः इत्यपि ज्ञातव्यम् अत्र इति।

तदग्रे जैनविश्वविद्यालयस्य प्रतिष्ठापकः कुलाधिपतिः डा। चेन्नराजरायचंदवर्यः अवदत् यत् अस्माकं विश्वविद्यालयः भारतीयज्ञानपरम्परायाः विषये अधिकं ध्यानं ददाति। केन्द्रीयसंस्कृतविश्वविद्यालयेन सह मिलित्वा वयं कार्यं कुर्मः। तदग्रे The mythic society इत्यस्य निर्वाहकः अवदत् यत् एतादृशकार्यक्रमाणां सङ्घटनेन संस्कृतस्य संस्कृतेश्च प्रसारः शक्यते। एम् डी. श्रीनिवासन् महोदयः आङ्ग्लभाषायां ग्रन्थस्य पुरोवाक् अलिखत्। सः महोदयः अवदत् यत् भूमेः गतिं भूकम्पसम्भावनां चाधिकृत्य अतीव गूढम् अध्ययनं आर् एन् अय्यङ्गार वर्यः अकरोत्। देशसुरक्षाकार्येऽपि महोदयस्य योगदानं वर्तते इति। महासलिलस्य (संस्कृतेन) वैशिष्ट्यं लिखितवता आचार्यवीरनारायणपाण्डुरङ्गिवर्येण उक्तं यत् आङ्ग्लेयाः विज्ञानस्य सृष्टारः पुनश्च तेषाम् आगमनेन अस्माकं विकासः जातः इत्येतादृशः भावः अधुना वा हातव्य एव। अस्माकं भारतीयविज्ञानपरम्परा अविच्छिन्नपरम्परा आसीत्। सा अधुना पुनरपि मुख्यवाहिन्याम् प्रवहेत्। लेखकः एतादृश-कार्यरतः तपस्वी च । तस्मै अभिनन्दनम्।

अन्ते आर् एन् अय्यङ्गार वर्यः भावुकः भूत्वा सर्वेभ्यः धन्यवादान् समार्पयत्। मम पञ्चाशद्वर्षाणां शैक्षणिकश्रमस्य शोधस्य च फलम् अत्र ग्रन्थे अस्ति। संस्कृतभाषा भाषणाय एव अस्ति। लोकव्यवहाराय पठनाय पाठनाय च संस्कृतम् इत्येवम् अधिकाः चिन्तयन्ति। परमेतावदेव न। इयमेका वैज्ञानिकी भाषा। सुसंस्कृतपरिवारे प्राप्तजन्मना आधुनिकविज्ञानेन सह भारतीयविज्ञानम् अधीतवता मया यदिदं कार्यं कृतं तच्च संस्कृतवाङ्मयस्य भारतीयविज्ञानस्य च क्षेत्रे अभिनव-विचारसञ्चारे साहाय्यं करोति। संस्कृतज्ञानां कृते विज्ञानिनां विज्ञानिनां च कृते संस्कृतज्ञानां महत्त्वम् कियदिति विज्ञातुं केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः वरखेडीवर्यः अद्य अवसरमकल्पयत्। महासलिलस्य प्रकाशनभारः विश्वविद्यालयेन सुष्ठु निरूढः अपि। अतः तस्मै सर्वेभ्यश्च मम धन्यवादाः इति। आरम्भे डा.शैलजाशर्मा ग्रन्थसारसङ्ग्रहं सभामुखं प्रस्तुती-कृतवती। जैनविश्वविद्यालयस्य शोधविभागीयः सुदर्शनमहोदयः लोकार्पणकार्यक्रमं सम्यक् निरवहत्। विश्वविद्यालयस्य प्रकाशनविभास्य प्रो.गणेशपण्डितः शोधसहायकः श्रीविनयशुक्लश्च साद्यन्तं सभायाम् उपस्थितौ। संयुक्तनिदेशकः डा.पवनव्यासवर्यः एतस्य प्रकाशनकर्मणि स्वीयं योगदानं यथेष्टम् अददात्। विश्वविद्यालयः वैज्ञानिकग्रन्थमेकं प्रकाश्य संस्कृतज्ञान् विज्ञानिनः उभयविद्याविशारदान् च एकस्यां सभायाम् एकत्रीकृत्य कृतकृत्योऽभूत्।

वार्तासारः - आचार्यः गणेशतिम्मण्णपण्डितः सहयोगः - डा. पवनव्यासवर्यः

साहाय्यम् - श्री.सुदर्शनः, जैनविश्वविद्यालयः, बेङ्गळूरु सहकारिणौ – श्रीशविनयौ